दत्तात्रेय उवाच ।
नृणां पादस्थिता लक्ष्मीर्निलयं संप्रयच्छति ।
सक्थिनि संस्थिता वस्त्रं रत्नं नानाविधं वसु ॥
कलत्रदा गुह्यसंस्था क्रोड़स्थापत्यदायिनी ।
मनोरथान् पूरयति पुरुषाणां हृदि स्थिता ॥
लक्ष्मीर्लक्ष्मीवतां श्रेष्ठं कण्ठस्था कण्ठभूषणम् ।
अभीष्टबन्धुदारैश्च तथाश्लेषं प्रवासिभिः ॥
मिष्टान्नं वाक्यलावण्यमाज्ञामवितथान्तथा ।
मुखसंस्था कवित्वञ्च यच्छत्युदधिसम्भवा ॥
शिरोगता संत्यजति ततोऽन्यं याति संश्रयम् ।
सेयं शिरोगता दैत्यान् परित्यजति साम्प्रतम् ॥”
इति मार्कण्डेयपुराणे दत्तात्रेयचरिताध्यायः ॥ * ॥
अथ लक्ष्मीचरित्रम् ।
श्रीसूत उवाच ।
“मेरुपृष्ठे सुखासीनां लक्ष्मीं पृच्छति केशवः ।
केनोपायेन देवि त्वं नृणां भवसि निश्चला ॥
श्रीरुवाच ।
शुक्लाः पारावता यत्र गृहिणी यत्र चोज्ज्वला ।
अकलहा वसतिर्यत्र तत्र कृष्ण वसाम्यहम् ॥
धान्यं सुवर्णसदृशं तण्डुला रजतोपमाः ।
अन्नञ्चैवातुषं यत्र तत्र कृष्ण वसाम्यहम् ॥
यः संविभागी प्रियवाक्यभाषी
वृद्धोपसेवी प्रियदर्शनश्च ।
अल्पप्रलापी न च दीर्घसूत्री
तस्मिन् सदाहं पुरुषे वसामि ॥
यो धर्म्मशीलो विजितेन्द्रियश्च
विद्याविनीतो न परोपतापी ।
अगर्व्वितो यश्च जनानुरागी
तस्मिन् सदाहं पुरुषे वसामि ॥
चिरं स्नाति दृतं भुङ्क्ते पुष्पं प्राप्य न जिघ्रति ।
यो न पश्येत् स्त्रियं नग्नां नियतं स च मे प्रियः ॥
त्यागः सत्यञ्च शौचञ्च यत्र एते महागुणाः ।
यः प्राप्नोति गुणानेतान् श्रद्धावान् स च मे प्रियः ॥
सर्व्वलक्षणमध्ये तु त्याग एव विशिष्यते ।
काले देशे च पात्रे च स च त्यागः प्रशस्यते ॥
नित्यमामलके लक्ष्मीर्नित्यं वसति गोमये ।
नित्यं शङ्खे च पद्मे च नित्यं श्रीः शुक्लवाससि ॥
वसामि पद्मोत्पलशङ्खमध्ये
वसामि चन्द्रे च महेश्वरे च ।
नारायणे चैव वसुन्धरायां
वसामि नित्योत्सवमन्दिरेषु ॥”
वसुन्धरायामित्यत्र वसौ धरायामिति वा पाठः ॥
“यथोपदिष्टा गुरुभक्तियुक्ता
पत्युर्व्वचो नाक्रमते च नित्यम् ।
नित्यञ्च भुङ्क्ते पतिभुक्तशेषं
तस्याः शरीरे नियतं वसामि ॥
तुष्टा च धीरा प्रियवादिनी च
सौभाग्ययुक्ता च सुशोभना च ।
लावण्ययुक्ता प्रियदर्शना या
पतिव्रता या च वसामि तासु ॥
श्यामा मृगाक्षी कृशमध्यभागा
सुभ्रूः सुकेशी सुगतिः सुशीला ।
गभीरनाभिः समदन्तपङ्क्ति-
स्तस्याः शरीरे नियतं वसामि ॥
या पापरक्ता पिशुनस्वभावा
स्वाधीनकान्तः परिभूयते च ।
अमर्षकामा कुचरित्रशीला
तामङ्गनां प्रेतमुखीं त्यजामि ॥
पुष्पं पर्य्युषितं पूतिं शयनं बहुभिः सह ।
भग्नासनं कुमारीञ्च दूरतः परिवर्जयेत् ॥
चिताङ्गारकमस्थीनि वह्निं भस्म द्विजञ्च गाम् ।
न पादेन स्पृशेत् पादं कार्पासास्थि तुषं गुरुम् ॥
नखकेशोदकञ्चैव मैथुनं पर्व्वसन्ध्ययोः ।
वर्जयेन्नग्नशायित्वमेकाकी मिष्टभोजनम् ॥
शिरः सपुष्पं चरणौ सुपूजितौ
निशाङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥
सम्मार्जनीरजोवात निर्गुण्डीं लकुचन्तथा ।
रात्रौ विल्वपलाशञ्च कपित्थं वर्जयेद्दधि ॥
खगात्रासनयोर्वाद्यं अपूजा सद्मपादयोः ।
उच्छिष्टस्पर्शनं मूर्द्ध्नि स्नानाभ्यङ्गञ्च वर्जयेत् ॥
शयनञ्चान्धकारे च रात्रिवासो दिने तथा ।
स्नानाम्बरं कुवेशञ्च वर्जयेत् शुष्कभोजनम् ॥
परेणोद्दर्शितं वचः स्वयं माल्यापकर्षणम् ।
आलस्यमवसादञ्च न कुर्य्याल्लोष्टमर्द्दनम् ॥
शुक्रवारे च यत्तैलं शिलापिष्टञ्च दर्शके ।
स्वयं वामेन मूर्द्धानं पाणिना नैव संस्पृशेत् ॥
तारकाः पुष्पवन्तो च न पश्येदशुचिः पुमान् ।
नेक्षेद्गुह्यं परस्त्रीणां नास्तं यान्तं दिवाकरम् ॥
कुर्य्यान्नाम्बधनाकाङ्क्षां परस्त्रीणां तथैव च ।
परेषां प्रतिकूलञ्च उदितार्के प्रबोधनम् ॥
नखकण्टकरक्तैश्च मृत्तिकाङ्गारखारिभिः ।
वृथा विलेखनं भूमौ न कुर्य्यान्मम काङ्क्षया ॥
स्वयं दीपं स्वयं माल्यं स्वयं हृत्वा चन्दनम् ।
नापितस्य गृहे क्षौरं शक्रादपि हरेत् श्रियम् ॥”
स्वयं दीपमित्यत्र यचितश्चेति वा पाठः ।
“न निन्द्यां गणके विप्रे पादयोर्नैवमन्तथा ।
प्रतिकूलचरेत् स्त्रीणां भुक्ता च दन्तधावनम् ॥
अहुतं मांसरूपञ्च नग्नाश्चैव स्त्रियन्तथा ।
भक्षणाद्दर्शनाच्चैव शक्रादपि हरेत् श्रियम् ॥
मत्तैरयुक्तः परदारसेवी
आचारहीनः परसेवकश्च ।
बह्वीर्ष्यचारी परिवादशील-
स्तं निष्ठुरं दम्भमयं त्यजामि ॥
शयनञ्चार्द्रपादेन रात्रिवासो दिने तथा ।
नोत्तरीयमधः कुर्य्यात् शुष्कपादेन भोजनम् ॥
अशुचिं स्नानवस्त्रञ्च दुर्गन्धामसुखावहाम् ।
अभूषणामपुष्पाञ्च न कुर्य्यादात्मनस्तनुम् ॥
कर्णे च वदने प्राणे तथा करतलेऽपि च ।
पादे पृष्ठे तथा नेत्रे न कुर्य्यादनुलेपनम् ॥
चक्षुर्लग्ने हृतं श्रेयो सुखलग्ने धनक्षयः ।
दरिद्रः कर्णलग्ने च पादपृष्ठे तथायुषः ॥
गन्धं पुष्पं यथा तोयं रत्नञ्चैव महोदधिम् ।
गृहीतं प्रथमं वस्त्रं वर्जयेन्न कदाचन ॥
अजरजः खररजस्तथा सम्मार्जनीरजः ।
स्त्रीणां पादरजो राजन् शक्रादपि हरेत्
श्रियम् ॥
कुचैलिनं दन्तमलप्रधारिणं
महाशठं निष्ठुरवाक्यभाषिणम् ।
सूर्य्योदये चास्तमिते तु शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ॥”
महाशठमित्यत्र बह्वाशिनमिति वा पाठः ।
“नित्यं छेदस्तृणानां क्षितिनखलिखनं पादयो-
रल्पशौचं
एकाङ्गे तैलहीनं वसनमलिनतावन्धनं मूर्द्ध-
जानाम् ।
द्वे सन्ध्ये चापि निद्रा विवसनशयनं ग्रासहासा-
तिरेकः
स्वाङ्गे पीठे च वाद्यं हरति धनपतेः केशव-
स्यापि लक्ष्मीम् ॥”
अवन्धनमित्यत्र रूक्षता इति वा पाठः ।
“एवं यः कुरुते नित्यं मयोक्तानि च केशव ! ।
तुष्टा भवामि तस्याहं त्वय्येवा निश्चला यथा ॥
श्रीभाषितमिदं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
तद्गृहं विपुलं रम्यं नित्यं भवति नान्यथा ॥
व्याधितो मुच्यते रोगी बद्धो मुच्येत बन्धनात् ।
आपदस्तस्य नश्यन्ति तमः सूर्य्योदये यथा ॥”
इति स्कन्दपुराणे लक्ष्मीकेशवसंवादे लक्ष्मी-
चरित्रं समाप्तम् ॥ * ॥ दुर्गा । यथा,—
“स्तुतिः सिद्धिरिति ख्याता श्रिया संश्रयणाच्च वा ।
लक्ष्मीर्मा लक्षना वापि क्रमात् सा कान्ति-
रुच्यते ॥
इति देवीपुराणे ५५ अध्यायः ॥
सम्पत्तिः । शोभा । ऋद्ध्यौषधम् । वृद्धिनाम्नौ-
षधम् । फलिनीवृक्षः । इति मेदिनी । मे, २८ ॥
सीता । वीरस्त्रीवित् । इति शब्दरत्नावली ॥
स्थलपद्मिनी । हरिद्रा । शमी । दृषम् । मुक्ता ।
इति राजनिर्घण्टः ॥ मोक्षप्राप्तिः । इति
पञ्चीटीकायां नागभट्टः ॥ ( शोभा । यथा,
कुमारे । ३ । ४९ ।
“कपालनेत्रान्तरलब्धमार्गै-
र्ज्योतिःप्ररोहैरुदितैः शिरस्तः ।
मृणालसूत्राधिकसौकुमार्य्यां
बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः ॥”)

लक्ष्मीकान्तः, पुं, (लक्ष्म्याः कान्तः ।) नारायणः ।
यथा,—
“नमः कमलनेत्राय हरये परमात्मने ।
जगतः पालयित्रे च लक्ष्मीकान्त नमोऽस्तु ते ॥”
इति जन्माष्टमीव्रतकथा ॥

लक्ष्मीगृहं, क्ली, ( लक्ष्म्याः गृहमावासस्थानम् । )
रक्तोत्पलम् । इति त्रिकाण्डशेषः ॥ लक्ष्मी-
वेश्म च ॥

लक्ष्मीजनार्द्दनः, पुं, (लक्ष्म्याः सहितो जनार्द्दनः ।)
शालग्रामविशेषः । तस्य लक्षणं यथा,—
“एकद्वारे चतुश्चक्रं नवीननीरदोपमम् ।